तावर्त्तनात् पूर्व्वं प्रथमे प्रथमादधः” मा०पु०। अधि ऊर्द्ध्वम्। “ग्रस्तोदये सति विधोर्नाह्निर्भोजनमाचरेत्” वशि०। “अस्तङ्गयोरस्तगयोरद्यात् दृष्ट्वा परेऽहनि” व्यासः। ‘अहोरात्रं न भोक्तव्यं चन्द्रसूर्य्यग्रहो यदा मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततःपरम्’ विष्णुध०पु०। ‘सन्ध्याकाले यदा राहुर्ग्रसते शशिभास्करौ। तदहर्नैव भुञ्जीत रात्रावपि कदाचन” गर्गः। सायं सन्ध्यायां सूर्य्ये ग्रस्तास्ते, पूर्व्वेऽह्नि रात्रौ च न भोक्तव्यं, प्रातः सन्ध्यायां चन्द्रे ग्रस्तास्ते पूर्व्वरात्रावपरेऽह्नि च न भोक्तव्यमित्यर्थः नि०सि०। बालवृद्धातुरैर्विनेत्युक्तेस्तेषां विशेषः। “सायाह्ने ग्रहणं चेत् स्यादपराह्णे न भोजनम्। अपराह्णे, न मध्याह्ने, मध्याह्ने न तु सङ्गवे। भुञ्जीत संगवे चेत् स्यान्नपूर्व्वं भोजनक्रियेति” मा०पु० उक्तः’। एतच्च बालादिविषयमिति नि०सि०। “सर्वेषामेव वर्णानां सूतकं राहुदर्शने स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्ज्जयेत्” हेमा०षट्त्रिं०। “नवश्राद्धेषु यच्छिष्टं ग्रहपर्य्युषितञ्च यत्। सर्व्वं तद्दुष्टतामेति” स्मृतेः ग्रासकाले पक्वान्नादेरभक्ष्यता। अत्रापवादः। “आरनालं पयस्तक्रं दधि स्नेहाज्यपाचितम्। मणिकस्थोदकं चैव न दुष्येद्राहुसूतके” मेधा०। “अन्नं पक्वमिह त्याज्यं स्नानं सवसनं ग्रहे। वारितक्रारनालादि तिलदर्भैर्न दुष्यति” स्मृतिः १ पुंसवनाद्यन्नस्याभक्ष्यता। ‘याजकान्नं नवश्राद्धं संग्रहे चैव भोजनम्। स्त्रीणां प्रथमगर्भे च भुक्त्वा चान्द्रायणं चरेत्। ब्रह्मौदने च सोमे च सीमन्तोन्नयने तथा। जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत्” आप०। संग्रहे स्त्रीणामेव व्यभिचारादिदोषार्थप्रायश्चित्तेन संग्रहे। ब्रह्मौदने आपोवसययज्ञाङ्गकर्म्मविशेषे प्रा०वि०। “जन्मप्रभृति संस्कारे बालस्यान्नस्य भोजने। असंपिण्डैर्न भोक्तव्यं श्मशानान्ते विशेषतः” अङ्गि०। “निर्वृत्ते चूड़होमे च प्राङ्नामकरणात् तथा। चरेत् सान्तपनं भुक्त्वा जातकर्म्मणि चैव हि” व्यासः। भोजनकाले मूत्राद्युत्सर्गेऽन्नमात्रस्याभक्ष्यता। “मूत्रोच्चारसमुत्सर्गे मोहात् भुङ्क्तेऽथ वा पिबेत्। त्रिरात्रं कुर्व्वीत” शाता०। भोजनकाले सूतकाद्यशौचे भक्ष्यमाणान्नस्याभक्ष्यता “यदा भोजनकाले तु अशुचिर्भवति द्विजः। भूमौ निःक्षिप्य तं ग्रासं स्नात्वा विप्रो विशुध्यति। भक्षयित्वा तु तं ग्रासमहोरात्रेण शुध्यति अशित्वा सर्व्वमेवान्नं त्रिरात्रेण विशुध्यति” शाता०। “अशुचिः सूतकादिनेति” प्रा०वि०। तैलाभ्यङ्गादिना स्नानार्हस्याकृतस्नानस्यान्नमात्रस्याभक्ष्यता। “समुत्पन्ने द्विजः स्नाने भुञ्जीताथ पिबेत्तथा। गायत्र्यष्टसहस्रं तु जपेत् स्नात्वा समाहितः” सं०ब०। स्नाने तैलाभ्यङ्गक्षौरादिनिमित्ते स्नाने प्राप्ते प्रा०वि०। नीलीवस्त्रपरिधाने द्रव्यमात्रस्याप्यभक्ष्यता। “नीलीवस्त्रं परिधाय भुक्त्वा स्नानार्हकस्तथा। त्रिरात्रं तु व्रतं कुर्य्यात्” शङ्खः। “लोहितान् व्रश्चनांस्तथा। अनुपाकृतमांसानि विड्जानि कवकानि च वृथाकृषरसंयावपायसापूपशष्कुलीरिति” या०। विड्जानि अमेध्योद्भवानि। अमेध्यदेशोद्भवानान्तु न दुष्टता “अमेध्येषु तु ये वृक्षा उप्ताः पुष्पफलोपगाः तेषाञ्चैव प्रदुष्यन्ति पत्रपुष्पफलानि चेति” बौधा० उक्तेः। अतिथ्यादिष्वभुक्तवत्सु गृहस्थस्यान्नमात्रस्याभक्ष्यता ‘देवतातिभूतेषु भृत्येष्वभ्यागतेषु च। अभुक्तवत्सु येऽश्नन्ति तथा पित्रग्निपक्षिषु। दुष्टान्नपर्य्यनिर्यासभुजः सूचीमुखास्तु ते। जायन्ते गिरिवर्ष्माणः” इति मार्क०पु०। ‘असंतर्प्य पितॄन् देवानाद्यादन्नं नवं क्वचित्। पक्वान्नं चापि नो मांसमिति का०ख०। भक्ष्येष्वपि देवायानिवेदितमभक्ष्यमेव “अनिवेद्य न भुञ्जीत मत्स्यमांसादिकं च यत्। अन्नं विष्ठा पयोमूत्रं यद्विष्णोरनिवेदितम्” आ०त०पु०। “तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः” गीता ब्रह्मचारिणोऽभक्ष्याणि। ‘मासिकान्नन्तु योऽश्नीयादसमावर्त्तको द्विजः। स त्रीण्यहान्युपवसेद्” मनुः। “मृतान्नं मधुमांसञ्च नैवाश्नीत व्रती क्वचित्। त्रिरात्रोपोषितः सम्यग्रात्रिमेकां जले वसेत्” देवलः। ‘सूतिकान्नं नवश्राद्धं मासिकान्नं तथैव च। ब्रह्मचारी च योऽश्नीयात् मधुमांसं कथञ्चन प्राजापत्यं तु कृत्वादौ मौञ्जीहोमेन शुध्यति” संव०। मांसं च शिष्टभक्ष्यमांसपरम् ‘ब्रह्मचारी चेन्मधुमांसमश्नीयात् शिष्टभोजनीयं, कृच्छ्रं द्वादशरात्रञ्चरित्वा व्रतशेषं समापयेत्” वशि०उक्तेः। अस्यापवादः “स चेत् व्यधीयत कामं गुरोरुच्छिष्टं भैषज्यार्थं सर्वं प्राश्नीयात् येनेच्छत्तेन चिकित्सेत् स यदा अगदः स्यादादित्यमुपतिष्ठेत्” बौधा०। अस्य पात्रविशेषे द्रव्यमात्रस्याभक्ष्यता। “आमिषस्य तु यो भाण्डे पक्वमश्नीत सुव्रतः (ब्रह्मचारी)। कुशमूलविपक्वेन त्र्यहं क्षीरेण वर्त्तयेत्” लघुहारीतः।

सर्वापवादः। “जातमात्रः शिशुस्तावद्यावदष्टौ समाः” स्मृताः। भक्ष्याभक्ष्येषु नो दुष्येद्यावन्नैवोपनीयते” का०ख० एवमन्यान्यपि स्मृतौ निषिद्धानि द्रष्टव्यानि वैद्यकोक्तदोषादपि कानिचिदभक्ष्याणि तानि चापथ्यशब्दे २२६पृष्ठे प्रायशो दर्शितानि विशेषतः कानिचित् प्रदर्श्यन्ते “वर्जयेत् पयसा स्विन्नं मत्स्यमांसमनूपकम्। कदलीफलम-